# || श्री स्वामी सामर्थ ||

---

## || श्री गणपत्यथर्वशीर्ष ||

---

।श्री गणेशाय नमः।
। श्री स्वामी सामर्थाय नमः ।

*|| शान्ति पाठ ||*

ॐ भद्रं कर्णेभिः शृणुयाम देवा ।भद्रं पश्येमाक्षभिर्यजत्राः ॥
स्थिरैरङ्गैस्तुष्टुवांसस्तनूभिः । व्यशेम देवहितं यदायुः ॥

ॐ स्वस्ति न इन्द्रो वृद्धश्रवाः । स्वस्ति नः पूषा विश्ववेदाः ॥
स्वस्तिनस्तार्क्ष्यो अरिष्टनेमिः । स्वस्ति नो बृहस्पतिर्दधातु ॥
ॐ तन्मामवतु तद् वक्तारमवतु अवतु माम् अवतु वक्तारम्
ॐ शांतिः । शांतिः ॥ शांतिः॥।

*|| उपनिषत् ||*

हरिः ॐ नमस्ते गणपतये ॥ त्वमेव प्रत्यक्षं तत्त्वमसि ॥
त्वमेव केवलं कर्ताऽसि ॥ त्वमेव केवलं धर्ताऽसि ॥
त्वमेव केवलं हर्ताऽसि ॥ त्वमेव सर्वं खल्विदं ब्रह्मासि ॥
त्वं साक्षादात्माऽसि नित्यम् ॥ १॥

*|| स्वरूप तत्त्व ||*

ऋतं वच्मि ॥ सत्यं वच्मि ॥ २॥ अव त्वं माम् ॥
अव वक्तारम् ॥ अव श्रोतारम् ॥ अव दातारम् ॥
अव धातारम् ॥अवानूचानमव शिष्यम् ॥अव पश्चात्तात् ॥
अव पुरस्तात् ॥अवोत्तरात्तात् ॥ अव दक्षिणात्तात् ॥

अव चोर्ध्वात्तात् ॥ अवाधरात्तात् ॥
सर्वतो मां पाहि पाहि समंतात् ॥ ३॥
त्वं वाङ्मयस्त्वं चिन्मयः ॥ त्वमानंदमयस्त्वं ब्रह्ममयः ॥
त्वं सच्चिदानंदाद्वितीयोऽसि ॥ त्वं प्रत्यक्षं ब्रह्मासि ॥
त्वं ज्ञानमयो विज्ञानमयोऽसि ॥४॥सर्वं जगदिदं त्वत्तो जायते ॥
सर्वं जगदिदं त्वत्तस्तिष्ठति ॥ सर्वं जगदिदं त्वयि लयमेष्यति ॥
सर्वं जगदिदं त्वयि प्रत्येति ॥ त्वं भूमिरापोऽनलोऽनिलो नभः ॥
त्वं चत्वारि वाक्पदानि ॥ ५॥ त्वं गुणत्रयातीतः त्वमवस्थात्रयातीतः ॥
त्वं देहत्रयातीतः ॥ त्वं कालत्रयातीतः ॥त्वं मूलाधारस्थितोऽसि नित्यम् ॥
त्वं शक्तित्रयात्मकः ॥ त्वां योगिनो ध्यायंति नित्यम् ॥
त्वं ब्रह्मा त्वं विष्णुस्त्वं रुद्रस्त्वं इन्द्रस्त्वं अग्निस्त्वं
वायुस्त्वं सूर्यस्त्वं चंद्रमास्त्वं ब्रह्मभूर्भुवःस्वरोम् ॥ ६॥

*॥ गणेश मंत्र ॥*

गणादिं पूर्वमुच्चार्य वर्णादिं तदनंतरम् ॥अनुस्वारः परतरः ॥
अर्धेन्दुलसितम् ॥ तारेण ऋद्धम् ॥एतत्तव मनुस्वरूपम् ॥
गकारः पूर्वरूपम् ॥अकारो मध्यमरूपम् ॥ अनुस्वारश्चान्त्यरूपम् ॥
बिन्दुरुत्तररूपम् ॥ नादः संधानम् ॥संहितासंधिः ॥
सैषा गणेशविद्या ॥ गणकऋषिः ॥ निचृद्गायत्रीच्छंदः ॥
गणपतिर्देवता ॥ ॐ गं गणपतये नमः ॥ ७॥

*॥ गणेश गायत्री ॥*

एकदंताय विद्महे । वक्रतुण्डाय धीमहि ॥ तन्नो दंतिः प्रचोदयात् ॥ ८॥

*॥ गणेश रूप ॥*

एकदंतं चतुर्हस्तं पाशमंकुशधारिणम् ॥ रदं च वरदं हस्तैर्बिभ्राणं मूषकध्वजम् ॥
रक्तं लंबोदरं शूर्पकर्णकं रक्तवाससम् ॥रक्तगंधानुलिप्तांगं रक्तपुष्पैः सुपूजितम् ॥
भक्तानुकंपिनं देवं जगत्कारणमच्युतम् ॥आविर्भूतं च सृष्ट्यादौ प्रकृतेः पुरुषात्परम् ॥
एवं ध्यायति यो नित्यं स योगी योगिनां वरः ॥ ९॥

*॥ अष्ट नाम गणपति ॥*

नमो व्रातपतये । नमो गणपतये । नमः प्रमथपतये ।

नमस्तेऽस्तु लंबोदरायैकदंताय । विघ्ननाशिने शिवसुताय ।

श्रीवरदमूर्तये नमो नमः ॥ १०॥ॐ गं गणपतये नम:

*॥ फलश्रुति ॥*

एतदथर्वशीर्षं योऽधीते ॥ स ब्रह्मभूयाय कल्पते ॥स सर्वतः सुखमेधते ॥

स सर्व विघ्नैर्नबाध्यते ॥स पंचमहापापात्प्रमुच्यते ॥

सायमधीयानो दिवसकृतं पापं नाशयति ॥प्रातरधीयानो रात्रिकृतं पापं नाशयति ॥

सायंप्रातः प्रयुंजानो अपापो भवति ॥ सर्वत्राधीयानोऽपविघ्नो भवति ॥

धर्मार्थकाममोक्षं च विंदति ॥ इदमथर्वशीर्षमशिष्याय न देयम् ॥

यो यदि मोहाद्दास्यति स पापीयान् भवति

सहस्रावर्तनात् यं यं काममधीते तं तमनेन साधयेत् ॥ ११॥

अनेन गणपतिमभिषिंचति स वाग्मी भवति ॥

चतुर्थ्यामनश्नन् जपति स विद्यावान् भवति ।स यशोवान् भवति ॥

इत्यथर्वणवाक्यम् ॥ ब्रह्माद्यावरणं विद्यात् न बिभेति कदाचनेति ॥ १२॥

यो दूर्वांकुरैर्यजति स वैश्रवणोपमो भवति ॥

यो लाजैर्यजति स यशोवान् भवति ॥स मेधावान् भवति ॥

यो मोदकसहस्रेण यजति स वाञ्छितफलमवाप्नोति ॥

यः साज्यसमिद्भिर्यजति स सर्वं लभते स सर्वं लभते ॥ १३॥

अष्टौ ब्राह्मणान् सम्यग्ग्राहयित्वा सूर्यवर्चस्वी भवति ॥

सूर्यग्रहे महानद्यां प्रतिमासंनिधौ वा जप्त्वा सिद्धमंत्रो भवति ॥

महाविघ्नात्प्रमुच्यते ॥ महादोषात्प्रमुच्यते ॥महापापात् प्रमुच्यते ॥

स पंचमहा पातको पातकात प्रमुच्यते ॥

स सर्व विद्भवति स सर्व विद्भवति ॥

य एवं वेद इत्युपनिषत् ॥ १४॥

*॥ शान्ति मंत्र ॥*

ॐ सहनाववतु ॥ सहनौभुनक्तु ॥सह वीर्यं करवावहै ॥

तेजस्विनावधीतमस्तु मा विद्विषावहै ॥

ॐ भद्रं कर्णेभिः शृणुयाम देवा । भद्रं पश्येमाक्षभिर्यजत्राः ॥
स्थिरैरंगैस्तुष्टुवांसस्तनूभिः । व्यशेम देवहितं यदायुः ॥
ॐ स्वस्ति न इन्द्रो वृद्धश्रवाः । स्वस्ति नः पूषा विश्ववेदाः ॥
स्वस्तिनस्ताक्ष्र्यो अरिष्टनेमिः । स्वस्ति नो बृहस्पतिर्दधातु ॥
ॐ शांतिः । शांतिः ॥ शांतिः ॥।
॥ इति श्रीगणपत्यथर्वशीर्षं समाप्तम् ॥

॥ श्रीगुरुदत्तात्रेयार्पणमस्तु ॥
|| श्री स्वामी समर्थार्पण मस्तु||